तत्पर्य्यायः । पत् २ अङ्घ्रिः ३ चरणः ४ । इत्यमरः ॥ अंह्रिः ५ । इति शब्दरत्नावली ॥ * ॥ ऋग्वेदीयमन्त्रचतुर्थांशः । श्लोकचतुर्थांशः । यथा, पादाश्चेल्लोपे सत्येव पूर्य्येत । इह ऋक्पाद एव गृह्यते । इति वामनः ॥ अविशेषात् श्लोकपादोऽपि । इत्यपरे । इति सिद्धान्तकौमुदी ॥ * ॥ पादद्वारा पादाक्रमणादिनिषेधो यथा,—

"पादेन नाक्रमेत् पादमुच्छिष्टं नैव लङ्घयेत् ।
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः ॥"
इति कर्म्मलोचनम् ॥ * ॥

पादचालनादिनिषेधो यथा,—

"न पादचालनं कुर्य्यात् पादेन वा कदाचन ।
नाग्नौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः ॥
नातिप्रसारयेद्देवं ब्राह्मणान् गामथापि वा ।
वाय्वग्निनृपविप्राणां सूर्य्यं वा शशिनं प्रति ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥

पादेन्द्रियस्याध्यात्मत्वं तस्मिन्नधिभूतमधिदैवतञ्च यथा, महाभारते आश्वमेधिकपर्व्वणि ४२ अध्याये ।

"अतः परं प्रवक्ष्यामि सर्व्वं विविधमिन्द्रियम् ।
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः ॥
अधिभूतन्तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ॥"

बुध्नः । वृक्षमूलम् । तुरीयांशः । चतुर्थभागः । शैलप्रत्यन्तपर्व्वतः । महाद्रिसमीपे क्षुद्रपर्व्वतः । ( यथा, हरिवंशे ६४ । २० ।

"उभयोर्विन्ध्यऋक्षयोः पादे नगयोस्तां महापुरीम् ॥" )

मयूखः । किरणः । इति मेदिनी ॥ ( शिवः । यथा, महाभारते । १३ । १७ । १२४ ।

"न्यायनिर्व्वपणः पादः पण्डितो ह्यचलोपमः ॥"

चिकित्सापादचतुष्टयं यथा,—

"वैद्यो व्याध्युपसृष्टस्तु भेषजं परिचारकः ।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः ॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उद्गातृहोतृब्रह्माणो यथाध्वर्य्युं विनाध्वरे ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति च सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥

"कारणं षोड़शगुणं सिद्धौ पादचतुष्टयम् ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥

अस्य शुभलक्षणं यथा,—

"अस्वेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ च निगूढ़गुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥"

अशुभलक्षणञ्च यथा,—

"शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्रदुःखप्रदौ ॥" )

पादकटकः, पुं, ( पादस्य कटक इवेति । ) नूपुरः । रवशून्यहंसाकृतिचरणभूषणम् । वेँक मल इति भाषा । तत्पर्य्यायः । हंसकः २ । इत्यमरभरतौ ॥

पादकृच्छ्रः, पुं, व्रतविशेषः । यथा,—

"एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन पादकृच्छ्र उदाहृतः ॥"
इति गारुड़े १०३ अध्यायः ॥

पादगण्डिरः, पुं, ( गण्यते चर्य्यते पूयरक्तादि यस्मात् यत्र वा पादे इत्यर्थः । गड़+किरच् इति गण्डिरः पदः ततो राजदन्तादिवत् परनिपातनात् साधुः । गण्डीर इति पाठोऽपि दृश्यते तत्र गड़+ईरन्प्रत्ययेन साधुरिति । ) श्लीपदम् । इति त्रिकाण्डशेषः ॥ गोद इति भाषा ॥ ( श्लीपदशब्देऽस्य विवृतिर्व्विज्ञेया ॥ )

पादग्रहणं, क्ली, ( पादयोर्ग्रहणम् इति । ग्रह+भावे ल्युट् । ) अभिवादनम् । पादस्पर्शपूर्व्वकप्रणामः । इत्यमरः ॥ तन्निषेधो यथा, "समिद्वार्य्युदकुम्भपुष्पान्नहस्तो नाभिवादयेत् यच्चाप्येवं युक्तम् ।" इति बौधायनः ॥

"जपयज्ञजलस्थञ्च समित्पुष्पकुशानलान् ।
दन्तकाष्ठञ्च भक्ष्यञ्च वहन्तं नाभिवादयेत् ॥"
इति लघुहारीतः ॥

न पुष्पाक्षतपाणिर्नाशुचिर्न जपन् न देवपितृकार्य्यं कुर्व्वन् । अभिवादयेदित्यनुवृत्तौ शङ्खलिखितौ ॥ * ॥ तद्विधिः ।

"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत् ॥
ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥" * ॥

तत्प्रकारः ।

"अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥
नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्तथैव च ॥
भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावो हि भो भाव ऋषिभिः स्मृतः ॥"
इति मनुः । २ । १२२—१२४ ॥

पादचतुरः, पुं, ( पादे पदव्यापारे गमनादौ चतुरः ।) छागः । सैकतम् । पिप्पलः । करकः । परदोषैकप्रवक्ता । इति मेदिनी । रे, ३०४ ॥

पादचारी, [ न् ] पुं, ( पद्भ्यां चरतीति । चर गतौ+णिनिः ) पदातिः । इति हेमचन्द्रः । ३ । १६२ ॥ पद्भ्यां गमनशीले, त्रि ॥ ( यथा, भागवते । ६ । १२ । २६ ।

"गिरिराट् पादचारीव पद्भ्यां निर्ज्जरयन् महीम् ।
जग्रास स समासाद्य वज्रिणं सहवाहनम् ॥")

पादजः, पुं, ( पद्भ्यां जायते इति । जन+डः । "पद्भ्यां शूद्रोऽजायत ।" इति श्रुतेर्ब्रह्मणः पद्भ्यां जातत्वात्तथात्वम् । ) शूद्रः । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ३६ । ६३ ।

"न विप्रा न च राजानो न वैश्या न च पादजाः ॥"

पादोद्भवमात्रे, त्रि ॥ )

पादत्राणं, क्ली, (पादयोस्त्राणं यस्मात् ।) पादुका । इति जटाधरः ॥ ( यथा, सुश्रुते चिकित्सितस्थाने ११ अध्याये । "अधनस्त्वबान्धवो वा पादत्राणातपत्रविरहितो भैक्ष्याशी ग्रामैकरात्रानुवासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत् ॥" शीतऋतूपचारेऽस्य व्यवहारो यथा,—

"उष्णस्वभावैर्लघुभिः प्रावृतः शयनम्भजेत् ।
शुष्कार्ककिरणान् स्वेदं पादत्राणञ्च सर्व्वदा ॥")

पादपः, पुं, ( पादेन मूलेन पिबति रसानिति । पा+कः ।) वृक्षः । इत्यमरः ॥ (यथा, हितोपदेशे । १ । ६३ ।

"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥"

पादौ पाति रक्षतीति । पा+रक्षणे+कः । ) पादपीठः । इति मेदिनी । पे, २१ ॥

पादपरुहा, स्त्री, ( पादपे वृक्षे रोहतीति । रुह+कः । ) वन्दाकः । इति राजनिर्घण्टः ॥

पादपा, स्त्री, ( पादौ पाति रक्षतीति । पा+कः+टाप् ।) पादुका । इति मेदिनी । पे, २१ ॥

पादपाशः, पुं, (पादस्य पाशः ।) अश्वपादरज्जुः । तत्पर्य्यायः । दामाञ्चनम् २ । इति हेमचन्द्रः । ४ । २६५ ॥

पादपाशी, स्त्री, ( पादपाश+स्त्रियां गौरादित्वात् ङीष् । ) खड्डुका । खेडुया इति भाषा ॥ शृङ्खला । शिकली इति भाषा ॥ इति मेदिनी ॥

पादपीठं, क्ली, ( पादस्य पीठम् । ) पादस्थापनासनम् । पा राखा टुल इति भाषा ॥ तत्पर्य्यायः । पदासनम् २ । इति हेमचन्द्रः । ३ । ३८२ ॥ ( यथा, रघुः । १७ । २८ ।

"वितानसहितं तत्र भेजे पैतृकमासनम् ।
चूड़ामणिभिरुद्घृष्टपादपीठं महीक्षिताम् ॥")

पादपीठिका, स्त्री, ( पादपीठं साधनत्वेनास्त्यस्या इति । पादपीठ+ठन् । ) नापितादिशिल्पम् । यथा,—

"नापितादिकशिल्पे तु कारिका पादपीठिका ॥"
इति शब्दमाला ॥